# Shri Natha Stotram

# શ્રીમૃન્નાથસ્તોત્રમ્

## Document Information

Text title : Shri Mrinnatha Stotram 03 16

File name : nAthastotram.itx

Category : vishhnu, stotra, shataka

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-16

Latest update : August 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2021

*sanskritdocuments.org*

# શ્રીમૃન્નાથસ્તોત્રમ્

શ્રીમત્ભૂ સમેત મૃદધીશ હરે મુરારે
    પાદામ્બુજં વિજયતે પરમાદ્ભુતં તે ।
યસ્મિન્ જના દૃઢતરાત્મનિબન્ધનેન
    મુક્તિં પ્રયાન્તિ સુનિરસ્તસમસ્તબન્ધાઃ ॥ ૧॥

રૂપાણિ તે બહુવિધાનિ વિભો ભવન્તી
    ત્યાહુઃ પરાપરવિદો મુનયઃ શુકાદ્યાઃ ।
તેષ્વેકમપ્યલમબોધહતાશયાનાં
    અસ્માદૃશાં નયનયોરયનં ન યાતિ ॥ ૨॥

યદ્રૂપદર્શનસુખાનુબુભૂષુલોકાન્
    ઉચ્ચસ્તરામનુજિધૃક્ષુરુપાત્તહાદઃ ।
હિત્વા પયોજલનિધિં યુતમૃન્નિકેતં
    અધ્યૂષિવાનસિ વિભો પ્રતિમામિષેણ ॥ ૩॥

તત્તે વપુર્ભુવનચારુ નિરીક્ષ્ય કર્તુ
    નિષ્પાપતાં વસુવતાં (?) ચ મયા ન શક્યમ્ ।
પ્રાગ્જન્મનિર્મિતશુભેતરકર્મણા ય
    દ્ભાગ્યાગતેઃ સુદૃઢસઙ્ઘટિતઃ કવાટઃ ॥ ૪॥

અન્યાનિ પાપશમનાનિ સુખાવહાનિ
    કર્માણિ સન્ત્યલમપેક્ષિતસાધનાનિ ।
તેષાં વિધિઃ પટુતરૈરપિ યત્નસાધ્યઃ
    કાયં ક વા વિવશભાવમુપાગતોઽહમ્ ॥ ૫॥

ત્વદ્રૂપવર્ણનમઘાન્તસુખાપ્તિહેતુઃ
    પુંસાં ભવેદ્ભુવિ યથામતિવાગ્વિલાસમ્ ।
ઇત્યાહુરાતવચસસ્તદહં યતિષ્યે
    તત્કર્તુમત્ર મયિ બેહિ કૃપાકટાક્ષમ્ ॥ ૬॥

નાથ ત્વદીયમકુટદ્યુતિનિર્જિતોઽસૌ
    શોકાતિરેકવહનેન ભિદેલિમાત્મા ।
ભાનોર્ગભરિતરુપયાતિ સહસ્રતાં યત્
    તેનાભિધીયત ઇહૈષ સહસ્ત્રધામા ॥ ૭॥

વિશ્વામરેશ્વરનિરન્તરસન્નિધાન
    સ્થાનસ્ય હેમમયભૂમિધરાધિપસ્ય ।
શશ્વત્પ્રદક્ષિણમસૌ વિદધાતિ ભાનુ
    વ ત્વદુજ્જ્વલકિરીટરુચઃ પ્રલોભાત્ ॥ ૮॥

પ્રદ્યોતનઃ પ્રતિદિનં ભવતઃ કિરીટ
    શુત્યાગ્રહાદ્વસુગણાન્ વિતરન્ સમન્તાત્ ।
યત્તશ્ચિરાદસમવાપ્તમનોરથઃ સ
    નસ્તં પ્રયાતિ ખલુ હીનવસુઃ ક્રમેણ ॥ ૯॥

આત્માવલોકનવિધાવધિકપ્રમોદ
    નેત્રેષુ સંવિદધતા જગતામધીશ ।
ત્વન્મૌલિના કથમનેન તુલામુપૈતુ
    હક્પીડનં વિરચયન્નયમુષ્ણતેજાઃ ॥ ૧૦॥

કૈશ્યં સતોયઘનદેશ્યમતીવ દૃશ્યં
    વિશ્વેશ તે વિજયતે ધૃતસૌરભં તત્ ।
યત્રાર્પણે સુમનાસામમરદ્રુમાણાં
    અર્થિત્વમેતિ નિવહોઽર્થિષુ દત્તકામઃ ॥ ૧૧॥

અન્તઃસ્થિતા કુટિલતા મલિનાત્મતા ચ
    દોષાવિતિ ત્રિજગતિ પ્રથિતૈવ વાર્તા ।
ત એવ તે ચિકુરભારગતે ગુણૌ સ્તઃ
    સૂતે મહત્ફલમહો મહતાં હિ સેવા ॥ ૧૨॥

ભાગીરથીં ભવશિરોનિલયાં વિલોક્ય
    તાક્પદં મહિતમાત્મકૃતેઽપિ કર્તુમ્ ।
ત્વત્પૂજનં વિહિતવત્યુપલબ્ધકામા
    મિત્રાત્મજેવ તવ ભાતિ કચાલિરેષા ॥ ૧૩॥

મન્દારપુષ્પમિલિતો મકુટોપનદ્ધ

માણિક્યરત્નકિરણાસ્તરણાભિરામઃ ।
ચન્દ્રાર્કરશ્મિનિકરચ્છુરિતામ્બુવાહ
ચ્છાયસ્ત્વદીયચિકુરણકરો વિભાતિ ॥ ૧૪॥

ફાલેન તે ભુવનમોહનમોહનેન
બાલઃ શશી સમતુલામધિશેઢુમિચ્છન્ ।
જાતશિરાર્ગલ ઇતિ પ્રથિતખિલોક્યાં
કો વાનુચાન જનવાદમનહકારી ॥ ૧૫॥

એવ સ્વૃત્તરહિતશ્ચ કલઙ્કવાંશ્ચ
યાતું લલાટસમતાં મમ વાઞ્છતીતિ ।
રોષરત્વયા મયિ ન કાર્ય ઇતીવ શંસન્
બાલઃ શશી શરણમાશ્રયતે પદં તે ॥ ૧૬॥

યત્તે લલાટફલકે તિલકં વિભાતિ
સ્મર્તુઃ સમસ્તભયહારિ ચ હાનિહારિ ।
શક્રાઇમપટ્ટલિખિતામલરૂપ્યરેખા
વિદ્વેષિ મન્યસનમેતદપાકરોતુ ॥ ૧૭॥

બ્રહ્માદયોઽપિ ચ યદીયમહામહિના
સમ્મોહિતા નિજનિજાધિકૃતૌ નિબદ્ધા ।
માયાપિ યચ્ચલનમાત્રવશાત્ સ્વકાર્યે
સા ગલ્ભતે જયતિ સા યુગલી ભ્રુવોસ્તે ॥ ૧૮॥

નેત્રાભિપૂર્ણકરુણારસવીચિશોભાં
આબિભ્રતી મદનકાર્મુકમાતૃકા સા ।
ભ્રૂવલ્લરી વિજયતે જગતીવિધાન
સ્થાનપ્રહાણચતુરા ચતુરાકૃતિસ્તે ॥ ૧૯॥

પઙ્કેરુહાણિ ભવદીક્ષણસામ્યલેશમ્ ।
હત્વા પુનસ્તદપરાધવિમાર્જનાય ।
પદ્માં ભવત્પ્રણયિનીમલમર્થયિત્વા
નિત્યં નિજાન્તરગૃહેષુ નિવાસયન્તિ ॥ ૨૦॥

યત્પ્રાહુરાપ્તવચસો મહતાં હિ દૃષ્ટે
નોં શત્રુબાન્ધવભિદેત્યમૃષા વચસ્તત્ ।
ચક્ષુઃ સરોજયુગલી ભવતસ્તથા હિ

કર્ણ ગતા ચ વિજયં ચ ગતેયમારતે ॥ ૨૧॥

ઉત્કર્ષમીપ્સુ કુમુદાદરવિન્દજાતં
પત્રદ્વયીમુપજહાર મનોહરાં તે ।
આદાય તામકુરુથા નિજનેત્રયુગ્મં
તેનૈતિ સર્વવિબુધાર્ચનયોગ્યતાં તત્ ॥ ૨૨॥

અર્કાત્મકં ભવતિ દક્ષિણમીક્ષણં તે
વામં ચ સોમમયમિત્યમૃષા વચસ્તત્ ।
યસમ્પ્રપાતવશતો હૃદિ ભક્તિભાજાં
નો વા કદાપ્યુદયગેતિ નમોઽણુનાપિ ॥ ૨૩॥

તાપપ્રદો દિનકરસ્તવ દક્ષિણા હક્
ભૂત્વા સમસ્તજનતાપમપાકરોતિ ।
તદ્વજ્જડપ્રકૃતિરોષધિપોઽપિ સવ્ય
નેત્રત્વમેત્ય જગતાં જડતાં ધુનોતિ ॥ ૨૪॥

નાસા વિભો તવ વિભાતિ તિલપ્રસૂન
સૂનં રુચા વિદધતી ચ સમુન્નતાગ્રા ।
યસ્યાઃ સમં નિજકતુણ્ડમિતિ સ્મરન્તઃ
કીરા ભવન્તિ બત પઞ્જરબન્ધયોગ્યાઃ ॥ ૨૫॥

વક્ત્રાભિધાનસરસીરુહમણ્ડને તે
નાસાહ્વયે રુચિવિરાજિનિ બીજકોશે ।
ચિત્તામ્બુજં લસતુ મે ભગવન્નજલં
યુક્તં સજાતિકમિથઃપરિમેલનં સ્યાત્ ॥ ૨૬॥

ઉદ્ભિદ્યમાનતરુપલ્લવતુલ્યકલ્પૌ
ઓષ્ઠાધરૌ તવ વરિષ્ઠતરૌ વિભાતઃ ।
યત્પાનયોગ્યમતિભાગ્યમુપેત્ય લક્ષ્મીઃ
શ્લાઘ્યા ભવત્યખિલલોકવિલાસિનીષુ ॥ ૨૭॥

દેવ ત્વદીયરદનચ્છદપલ્લવેઽસ્મિન્
આરુણ્યમેતદધરીકૃતબિમ્બશોભમ્ ।
લક્ષ્મયા હૃદન્તરનિરન્તરતોત્પતિષ્ણુઃ
પાનપ્રસક્ત ઇવ રાગભરો વિભાતિ ॥ ૨૮॥

માધુર્યમીપ્સુરધરામૃતસમ્ભવં તે-
    માતા જગત્ત્રયભુવામરવિન્દવાસા ।
ત્યક્ત્વા પયોજલધિમાપ્રવતી ભવન્તં
    કોવોત્તરોત્તરરસાભિરતિં ન કુર્યાત્ ॥ ૨૯॥

ઓષ્ટેન તે મૃદુનરેણ હરે રમાયાઃ
    શુદ્ધૈર્દ્વિજૈવિરચિતં ક્ષતમાપ્યતે યત્ ।
એતસ્ય સા નિરપરાધનવપ્રવાલ
    સઙ્ગેષુ ભઙ્ગકરણસ્ય ફલાનુભૂતિઃ ॥ ૩૦॥

મુક્તાવલેર્નિજરુચા સવદીયદન્તાત્
    ઉનત્વમસ્તિ યદમ નિજદોષમેષા ।
હતું સદા વ્યવસિતા નખરચ્છલેન
    ત્વત્પાદપદાપરિષેવણમાદધાતિ ॥ ૩૧॥

દન્તપ્રભાપ્રવિજિતં તવ પઙ્કજાક્ષ
    કુન્દપ્રસૂનમતનોરિષુતામવાપ્ય ।
ત્વન્નાયકં ત્રિભુવનં ક્ષુભિતં તનોતિ
    માનધયે સતિ ક એવ હિ જોષમાસ્તે ॥ ૩૨॥

મન્દસ્મિતં મધુરિપો મધુરં ત્વદીયં
    ચન્દ્રપ્રભા મમ મનોમયકૈરવસ્ય ।
ઉન્નિદ્રતાં જનયતાદતિતીવ્રતાપ
    સંસારભાસ્કરવિલાસનિપીડિતસ્ય ॥ ૩૩॥

યદ્યમ્બુજસ્ય વિદલદલમણ્ડિતસ્ય
    મધ્યં બતા તુહિનદીધિતિદીધિતિઃ સ્યાત્ ।
તમુમ્બુજાક્ષ ભવદાસ્યમહોત્પલે ત્વ-
    ન્મન્દસ્મિતાતિરસાવુપમામુપેયાત્ ॥ ૩૪॥

ગણ્ડદ્વયં મકરકુણ્ડલમણ્ડિતં તે
    નિર્ણિક્તશક્રમણિદર્પણદર્પહારિ ।
વર્ણપ્રકર્ષજનિતક્ષણમીક્ષણાનાં
    અર્ણોરહાક્ષ મમ ચેતસિ સન્નિધત્તામ્ ॥ ૩૫॥

એષા કપોલયુગલી મણિકર્ણિકાયાઃ-
    સ્નાનં સદા વિદધતી રુચિવારિપૂરે ।

નૈર્મલ્યમીગુપલબ્ધવતીતિ વક્તું
　　સામર્થ્યમેત ભુવને કતમસ્ય જિહ્વા ॥ ૩૬॥

કૃત્વા સમુદ્રમથનં ભવતા કિમર્થ
　　મુત્થાપિસ્તદુરસિ સ્થિત એષ ચન્દ્રઃ ।
આ જ્ઞાતમાત્મવદનં નિતરામમુષ્મા
　　દુત્કૃષ્ટશોભમિતિ બોધયિતું જનૈઘાન્ ॥ ૩૭॥

ત્વદ્વક્ત્રપદ્મસુષમાકણિકાશતાંશ
　　સ્તેયાદભૂન્મહદઘં જલજન્મનાં યત્ ।
સ્નાનેન તૈરવિરતં પરિધૂતમેતત્
　　સન્દૃશ્યતે પયસિ શૈવલકૈતવેન ॥ ૩૮॥

લોકત્રયેઽત્ર રમણીયપદાર્થસાર્થાન્-
　　આતન્વતો બહુવિધાનરબિન્દયોનેઃ ।
એકત્ર વાપિ ભવદાસ્યતુલાં વિધાતું
　　લોકેશ નાલમભવત્ કરકૌશલં તત્ ॥ ૩૯॥

પૂર્ણઃ કલાભિરખિલાભિરપિ દ્વિજાનાં
　　રાજાપિ તન્ન ખલુ વન્દ્યત એષ ચન્દ્રઃ ।
યત્તાવકેન વદનેન સમત્સરોઽસૌ
　　સ્વાત્માપકર્ષકર એવ મહદ્વિરોધઃ ॥ ૪૦॥

દેધારત્વદીયવચનામૃતભાગ્યભાગ
　　માધુર્યલેશમુપગૃહ્ય કિમપ્યકાર્ષીત ।
દ્રાક્ષાં સિતાં મધુ પયઃ કદલીફલં ચ
　　કિં વિસ્તરેણ વચસાં મધુરં સમસ્તમ્ ॥ ૪૧॥

કણ્ઠેન તે પરિભવં બત લમ્ભિતાસ્તે
　　શઙ્ખાઃ સરિદ્રમણવારિણિ લીનવન્તઃ ।
આક્રન્દિતેન ગુરુશોકભરોત્થિતેન
　　સાહાયકં વિદધતે જલધિ દાધ્વનીનામ્ ॥ ૪૨॥

વક્ષઃસ્થલીલસિતકૌસ્તુભરત્નભાભિઃ
　　કણ્ઠપ્રકાણ્ડમરણીકૃતમાવિભાતિ ।
અર્કપ્રભાઝરનિમનતનોર્ઘનસ્ય
　　લક્ષ્મી પરામનુહરન્ મધુકૈટભારે ॥ ૪૩॥

પદ્માલયાનખપદૈઃ પરિભૂષિતં તે
    તત્કર્ણનાલમુપમાપદવીં લભેત ।
ભાસ્વત્પલાશમુકુલાનિ સુલોહિતાનિ
    સ્કન્ધં તમાલનગમસ્ય યદિ શ્રયેયુઃ ॥ ૪૪॥

વક્ષસ્તવ સ્મરણશીલજનાનભીષ્ટ
    દ્વારાવૃતિસ્થિરકવાટમિદં વિભાતિ ।
યત્ર શ્રિયઃ સસુખખેલનયોગ્યગેહે
    મુક્તાદિરત્નનિકરા વિલસન્ત્યનેકે ॥ ૪૫॥

દેવ ત્વદીયહૃદગં તૃશકદા નાત્
    લક્ષ્મ્યાઃ સ્તનદ્વ્રાસહં સુદૃઢોપગૂઢે ।
ભક્તાનુકમ્પનવિધાવતિમાર્દવં ચ
    તચ્ચિત્રમેવ ભગવન્ હૃદયં મમૈતિ ॥ ૪૬॥

દોર્ભિશ્ચતુર્ભિરમરેઽત્ર અમરેન્દ્ર મણિપ્રવલુપ્ત
    સ્તમ્ભૈઃ પ્રશુમ્ભિતમુરઃ શ્રિતપુષ્પમાસ્યમ્ ।
ઉદ્રત્નદીપમુદિતાંશુબિતાનકં તત્
    પદ્માલયાનટનરઙ્ગતલં વિભાતિ ॥ ૪૭॥

ભૂના નિજસ્ય મહસઃ પરિપૂરિતાશો
    લોકેઽત્ર સન્તમસમન્તગતં ચ તન્વન્ ।
ઉત્થાનમભ્યુપગતઃ પયસાં નિધેશ્ચ
    ત્વદ્વક્ષસિ સ્ફુરતિ કૌસ્તુભબાલકાર્કઃ ॥ ૪૮॥

ચન્દ્રશ્ચ કૌસ્તુભમણિશ્ચ સહોદરૌ દ્વા
    વેકસ્તયોર્મદનસૈન્યપતિત્વમાગાત્ ।
અન્યઃ સમેત્ય ભગિનીસદનં તવોરઃ
    સમ્પન્નમીશ તનુતે મહસા નિજેન ॥ ૪૯॥

હારીતિ વક્તુમુચિતં ખલુ તદ્વદત્ર
    હારેણ યુક્તમરવિન્દદુલાયતાક્ષ ।
વક્ષઃસ્થલેન તવ યોગમુપાગતઃ સન્
    હારઃ પુનર્ભવતિ હારિપદાભિધેયઃ ॥ ૫૦॥

યૈષા તવોરસિ વિરાજતિ વૈજયન્તી

તામાત્મદત્વમયતે કિમયે ગુણસ્તે ।
યત્સા કરોતિ સહસા સરસીરહાક્ષ
સેવાનુષક્તજનતામપિ વૈજયન્તીમ્ ॥ ૫૧॥

ભાવત્કવક્ષસિ વિભો પરિભાસમાનં
શ્રીવત્સસંજ્ઞમૃષિવર્યપદાબ્જચિહ્નમ્ ।
વેધત્રિલોચનભવત્સુ પરાત્મરૂપં
ત્વામેવ સત્ત્વમયમૂર્તિરિતિ બ્રવીતિ ॥ ૫૨॥

સ્વાલકૃતિસ્થિતમહાઘમણિપ્રકાણ્ડ
પ્રોદ્યત્પ્રભૌઘશબલાઃ સબલા ભુજારતે ।
તાપત્રયં સપદિ તજ્જનિકર્તૃપાપં
ચાપાસ્ય મે દદતુ મુક્તિયુતં ત્રિવર્ગમ્ ॥ ૫૩॥

એકઃ સુધીરિવ ગૃહીતસુદર્શનસ્તે
બાહુઃ પરો ધનદબત્સમુપેતશઙ્ખઃ ।
પદનાન્વિતોઽન્યતમ ઇભ્યગૃહોપમશ્ચ
શેષો મહાગદતયર્ષભશૈલતુલ્યઃ (?) ॥ ૫૪॥

ધારાસહસ્રકૃતદાનવવંશદાહ
દોષાનુષઙ્ગપરિદૃઢ્ગુણં તવેદમ્ ।
ચક્રં નિરસ્તભવચક્રમુપાશ્રિતાના
મારમાકરક્ષણમનુક્ષણમાદધાતુ ॥ ૫૫॥

અબ્જન્મનૈવ ન હિ કેવલમાપદાત્યાત્ (?)
અપ્યાપ્તવાન્ સહજતામનૃતદ્યુતેર્યઃ ।
સોઽયં ભુજાગ્રવસતિસ્તવ પાઞ્ચજન્યઃ
શ્રૂયેત મન્દ્રનિનદો મદસુપ્રયાણે ॥ ૫૬॥

પઙ્કેરુહં કરગતં તવ પાણિપાદ
નેત્રાનનં યુધિ વિજેતુમુપાગતેષુ ।
એકં ગૃહીતમિવ ભાતિ સરોરુહેષુ
ભીત્યા પ્રધાવ્ય પતિતાનિ વને પરણિ ॥ ૫૭॥

કૌમોદકી ત્વસમયેષ્વપિ રોષભારત્
દૈત્યાન્ સમેત્ય સતૃણં નિહનિષ્યતીતિ ।
મત્વા તતઃ કિમુ નિરોધુમયિ ત્વયાસૌ

એકેન પાણિકમલેન ધૃતા સદાસ્તે ॥ ૫૮॥

રોમાવલિસ્તવ વિરાજતિ હારયષ્ટયો
મધ્યસ્થિતા વિમલયોર્મધુપસ્નગાભા ।
ગઙ્ગાપ્રવાહયુગલસ્ય ગતોઽન્તરાલં
ઊર્ધ્વં પ્રવૃત્ત ઇવ ભાનુસુતાપ્રવાહઃ ॥ ૫૯॥

અભ્યર્થિતાનિ દદતી ભજતાં ફલાનિ
નાભ્યાલવાલત ઉદેત્ય રુગમ્બુપૂર્ણાત્ ।
આરૂઢવત્યુદરદેશમતીત્ય વક્ષો
રોમાલિકલ્પલતિકા તવ ભાસતે સા ॥ ૬૦॥

નાભિપ્રહિર્વિમલયા પ્રભયા પયોભિ
રાપૂરિતસ્તવ વિભાતિ ગભીરરૂપઃ ।
શ્રીમૃનાથસ્તોત્રં યસ્માદુદગ્ચિતવિચિત્રસરોરુહેણ
ત્વત્પ્રેરિતત્રિભુવનં કૃતવાન્ વિધાતા ॥ ૬૧॥

મધ્યપ્રદેશમતિસૂક્ષ્મતરસ્વરૂપ
મપ્યુહ્યમાનભુવનત્રયમણ્ડલં તે ।
ઉહામદામમાહિતોદરબન્ધનદ્ધં
શ્રદ્ધાપુરસ્સરમર્દિવમભ્યુપૈમિ ॥ ૬૨॥

મધ્યં તવેદશભિતીશ કથં બ્રવીમિ
હરભ્યાં નિજાનુભવતસ્તનુ નિશ્ચિતં યત્ ।
અભ્યાસિતં ત્રિભુવનૈરિતિ સજ્જનોક્ત્યા
વિસ્તારયુક્તમતિમાત્રમિતિ શ્રુતિભ્યામ્ ॥ ૬૩॥

કાન્તિપ્રવાહિ તપદેવ તવ દેવ નિતન્બબિમ્બ
કાચીગુણાકલિતમિત્યગિ કેચિદાહુઃ ।
નૈતે પ્રમાદસહિતા અનુયોગયોગ્યા-
કાગ્ચીપ્રધાનકલિતં તુ વયં વદામઃ (?) ॥ ૬૪॥

વિદ્યોતતે વરદ તે સ કટિ પ્રદેશઃ
લક્ષ્મ્યા ઘનેન જઘનેન સમાગમાદ્યઃ ।
સૌભાગ્યમાત્મસમવેતમનન્યલભ્યં
વ્યક્તં બ્રવીતિ સકલોપરિ વર્તમાનમ્ ॥ ૬૫॥

આપાદિતો યદિ શતાઙ્ગપરો નિજાર્થઃ-
    સ્યાદેવ તે ગુરુનિતમ્બભરેણ હાસ્યઃ (?) ।
મત્વેતિ મન્દમરુતં સ્વરથં મનોભૂઃ
    ચક્રે યદસ્ય તદનાગતકર્તૃતાહો ॥ ૬૬॥

કાઞ્ચી તવેયમરુણૈઃ કિરણૈર્નિતમ્બ-
    પ્રાન્તસ્તમાલસદૃશાં ચ રુચાં પ્રરોહૈઃ ।
શોણાસિસં કમપિ કાન્તિઝરં વિધાય
    તેનાનુલિમ્પત ઇમાનિ દિશાં મુખાનિ ॥ ૬૭॥

મુક્તાવલીપરિચિતા સુમનોરમા ચ
    પ્રોદ્યોતમાનમણિભૂષણતાં ચ યાતા ।
ત્વત્કાચિકામહિતલોચનચન્દ્રિકા ચ
    ભૂમન્ કથં ન વિબુધૈઃ પરિપૂજનીયા ॥ ૬૮॥

સન્ધ્યાપયોધરમનોહરમમ્બરં તે
    સન્ધ્યાનયોગ્યમનિશં જનશં દધાનમ્ ।
વન્ધ્યેતરં જનયિતું જનનપયાસં
    સન્ધારયેમહિ હૃદન્તરતન્તકીર્તે ॥ ૬૯॥

પાદારવિન્દયુગલં ભજતાં જનાનાં
    દૂરીકૃતં રચયિતું તરસા તમોઽન્ધમ્ ।
માલઃ પ્રભાકૃદુદિતઃ કિમિહેતિ શકાં
    પીતામ્બરં વિતનુતે ભવદીયમેતત્ ॥ ૭૦॥

ચિત્તં યથા વિટજનસ્ય નિતાન્તરક્તં
    વિસ્તારવચ્ચ મતિવદ્વિદુષાં જનાનામ્ ।
શાબ્દં ચ શાસ્ત્રમિવ સૂત્રગણૈર્સહાર્વૈઃ
    ક્લપ્તં વિરાજતિતરાં ભવદુત્તરીયમ્ ॥ ૭૧॥

ઊરુદ્વયેન ભવતઃ કૃતમત્સરાય યે
    ભાસ્વન્દ્વપાધિપકરા ભુવનોત્તરેણ ।
પ્રાણાધિકા અપિ ગજા અપરાધતોઽસ્માન્
    ન્યૂનૈર્ભવન્તિ ખલુ શઙ્ખલયા નિબદ્ધાઃ ॥ ૭૨॥

સ્થૂણાગણાશ્ચ ભવદુરુતુલાભિલાષો
    ત્કર્ષાદુદારમપરાધમવાપ્તવન્તઃ ।

તદ્દણ્ડનાય વિધિના વિહિતં શિરસ્સુ
　　નૈકેતનં ભરમહર્દિવમુદ્વહન્તિ ॥ ૭૩ ॥

ત્વક્સક્થિસામ્યકૃતદોષશમાય રમ્ભા
　　વિશ્રાણ્ય તે નિજફલાનિ જિતામૃતાનિ ।
ત્વત્સમ્પ્રસાદજનિતાન્તરમોદજાતં
　　શૈત્યં તનોર્બહિરપિ પ્રસૃતં બહન્તિ ॥ ૭૪ ॥

અષ્ટીવતોયમનિષ્ટનિરાસધૃષ્ટં
　　નિષ્ટ્યતનિર્મલસુનીલરુચિપ્રપઞ્ચમ્ ।
જઙ્ઘોરુહામનામયુતદેશયુગાન્તરાલે
　　સીમાવબોધનિહિતોપલવદ્વિભાતિ ॥ ૭૫ ॥

પુષ્પાયુધો ભુવનમોહવિધાનદક્ષં-
　　ચૂર્ણં વિધાય મણિસમ્પુટકદ્વયાન્તે ।
વિન્યસ્ય તન્નિહિતવાન્ કિમિહેતિ શઙ્કા
　　મઙ્ક્ષયત્યજિત જાનુયુગં તવેદમ્ ॥ ૭૬ ॥

નાત્યાયતે ચ ન ચ વામનતાપુપેતે
　　દૈત્યારિનાથમણિમણ્ડતુલામુપેતે ।
મઞ્જીરનદ્ધમણિદીપ્તિનિમગ્નરૂપે
　　સંજ્ઞાયતાં મમ મનઃ પ્રસૃતે ગતં તે (?) ॥ ૭૭ ॥

દગ્ધઃ પુરા પુરભિદા પુનરાત્મજન્તે
　　ભૂત્વા સ પુષ્પવિશિખં કલયાઞ્ચકાર ।
યદ્રૂપસૌષ્ઠવમવેક્ષ્ય નિજં નિષઙ્ગં
　　જવાદ્વયં જયતિ તે જગદર્યમેતત્ ॥ ૭૮ ॥

કસ્યાપિ જાત્વપિ નિજાન્વયજસ્ય કણ્ઠ
　　સ્ત્વજ્જન્યા સમરુચિઃ કિમુદેષ્યતીતિ ।
જ્ઞાતું મહાગણકમાશ્રયતે શિખીન્દ્રઃ ।
　　સ્કન્દં ન વક્તિ સ ચ શુક્કૃતિતન્દ્રિતોઽસ્ય ॥ ૭૯ ॥

મઞ્જીર એષ ભવતો મહનીયરૂપઃ
　　સવૃત્તતામુપગતઃ શ્રવણીયશબ્દઃ ।
વન્દ્યઃ સતાં ચ ભવતીતિ કિમત્ર ચિત્રં
　　તાહગ્ગુણો ન કથમસ્તુ સુવર્ણજન્મા ॥ ૮૦ ॥

ત્વગ્ચારરૂપમણિનૂ પુરનિસ્વનસ્ય
    સાદૃશ્યમાકલયિતું નિનદે સ્વકીયે ।
હંસઃ પ્રપદ્ય શરણં ચતુરાનનં તં
    તત્પત્રતામનુભજન ભજતેઽનુવેલમ્ ॥ ૮૧॥

આકર્ણનીયનિનદો ભૃશદૃશ્યરૂપઃ-
    સ્પર્શાન્વિતો રસદવર્ણનતાં પ્રપન્નઃ ।
સૌરભ્યવાનપિ વિભો તવ નૂ પુરોઽયં
    સન્તર્પણો વિજયતે સકલેન્દ્રિયાણામ્ ॥ ૮૨॥

પાદાપ્રમેતદયિ તે ન હિ વર્ણયામિ
    કિં તન્નિમિત્તમિતિ ચેદિદમુચ્યતે ચ ।
તદ્વર્ણને કમઠજાતિમુપૈતુ લજ્જાં
    તદ્વંશજાં તુ તવ મૂર્તિ મિયં ન થાયાત્ ॥ ૮૩॥

પઢેરુઇસ્ય અપતઃ પદસંજ્ઞિતસ્ય
    પત્રાણિ ભાન્તિ પરમગુલિસંજ્ઞિતાનિ ।
યેષુ ક્ષરન્મધુરસેષુ સતાં મુનીનાં
    ચેતોઽભિધા મધુકરાઃ સતતં રમન્તે ॥ ૮૪॥

મુદ્રાકૃતાધિકરુચિસ્તતિરઙ્ગુલીનાં
    મુદ્રાવિહીનરુચિરપ્યવભાસતે તે ।
લક્ષ્મીપતે ભવતિ પલ્લવહારિતાસ્યા
    ભક્તાવલેરપિ વિપલબહારિતા ચ ॥ ૮૫॥

આશાદશાધિવસતાં નિજસેવકાનાં
    આશાનુપૂરણકૃતેઽગુલયો દશૈતાઃ ।
ત્વત્પાદયોરપિ ચ તત્તમલાં વિલુમ્પૈ
    જ્યોત્સ્નાકિરશ્ચ દશ તન્નખચન્દ્રડિમ્ભાઃ ॥ ૮૬॥

ધાવલ્યમસ્તિ નખરેષુ તવેતિ કેચિત્
    પ્રાહુર્બુધાઃ કતિચિદત્ર તુ રક્તિમેતિ ।
પક્ષી નિસર્ગરમણીયતયા ત્રિલોક્યા
    ભક્તાનુરાગભજનાદપિ તૌ ઘટેતે ॥ ૮૭॥

એકસ્થિતિ વિતનુતો ન ગુણૌ વિરુદ્ધૌ

પાદદ્વયે તુ તવ નૈવમમેયધામન્ ।
મુક્તાવલીસુખકરા નખરાસ્ત એવ
મુક્તાવલીસુખહરાશ્ચ ભવન્તિ ચિત્રમ્ ॥ ૮૮॥

શ્યામાત્મનસ્તવ કુતો નુ પદામ્બુજાભ્યા
માસાદિતઃ પરમશોભન એષ રાગઃ ।
કિં વા નમત્સુરકિરીટમણેરુતાહો
સંવાહનેષુ કમલાકરપલ્લવાભ્યામ્ ॥ ૮૯॥

દાનક્રિયાધરિતકલ્પકવૃક્ષમૂર્ધ
ન્યાસેન તત્કિસલયોત્કરતઃ કિમાહો ।
દૈત્યારિનાથમથનક્રમણે તદાસ્ય
નિષ્યન્દમાનબહલક્ષતજપ્રવાહાત્ ॥ ૯૦॥

મુક્તિપ્રદં મહિતકાન્તિયુતં સમસ્ત
સમ્પત્કરં ચ વિપદાં હરણપ્રવીણમ્ ।
ઋષ્યનગ્નાધનવિપન્નજયાશયાનાં
સઙ્ઘટ્ટસઙ્કુટનિવાસપદં પદં તે ॥ ૯૧॥

શ્રીમૃનાથસ્તોત્રં અમ્ભોરુહાણિ નવપાદપપલ્લવાનિ
ત્વત્પાદયોરભિલષન્તિ સહક્ષતાં યત્ ।
સૈષાં ન દોષ ઇહ કિં નુ વનેશયાનાં
સ્વસ્યાપરસ્ય ચ વિશેષનિબોધલેશઃ ॥ ૯૨॥

યત્પાદપદ્મમહિમગિતીશ શક્યં
નો દેદિતું પ્રસિતિરસ્તિ તથા વિકારિકિ કાપિ ।
યત્તત્પરાગવહનેન પુરા સ્વમૂર્ના
શક્તોઽભવત્ કમલભૂર્ભુવનાનિ કર્તુમ્ ॥ ૧૩॥

એતાવતાપિ પદયોર્મહિમાનુમેય
સ્તોયં યદીયનખધાવનપૂતપૂતમ્ ।
લોકત્રયીવૃજિનકાનનદાહદક્ષં
દક્ષારિણા શિરસિ યદ્ભિયતેઽનુવેલમ્ ॥ ૯૪॥

રેખા વિભાતિ ચરણે તવ સૂક્ષ્મસૂક્ષ્મા
સ્થૂલસ્ય મઙ્ગલશતસ્ય સદા સવિત્રી ।
કાર્યાણિ કારણગુણાન્ દધતીતિ વાર્તો

મિથ્યેતિ યા કથયતે નિજચેષ્ટયૈવ ॥ ૯૫॥

ચિત્રં ભવોષ્મહરણં મહદકુશં ચ
સેવાકૃતાં વ્યસનવારણવારણાર્થમ્ ।
હર્ષાભિષેકવિધયે કલશાઙ્કુરેખા
રૂપં દધજયતિ તે પદપદ્મયુગ્મમ્ ॥ ૯૬॥

તોયં નિપીય તવ કાન્તિમવાપ્ય મેઘા
ગર્જન્ત અર્જિતમદા દિવિ સઞ્ચરન્તઃ ।
તસ્મિન્ ગતે વિરુચયો લઘવશ્ચ સન્તિ
શોભાં લભેત ભુવિ કઃ સ્વધનપ્રણાશે ॥ ૯૭॥

ત્વત્કાન્તિલેશહરણાદપરાધવન્ત
સ્વાસાત્તમાલતરવો વિપિને નિલીનાઃ ।
સત્ત્વાશ્રયોઽપિ ચ ગભીરતરોઽપિ સિન્ધુઃ
શબ્દાયતે તરલતાં ચ મુહુઃ પ્રયાતિ ॥ ૯૮॥

ત્વચ્ચારુવિગ્રહગુણાન્ ભણિતું ફણીન્દ્રઃ
શબ્દાન્ વિધાય વિતતાન્ વિવિધપ્રમાણાન્ ।
જિહ્વાસહસ્ત્રયુગલેન નિગદ્ય નાન્તં
ગચ્છન્નનન્ત ઇતિ નામ જગાદમિ નૂનમ્ ॥ ૯૯॥

તત્તાદૃશામપિ મુકુન્દ ભવદ્ગુણાનાં-
તાવત્પ્રશંસનવિધૌ ભુતિ કઃ સમર્થઃ ।
બુદ્ભથા પ્રગૃહ્ય કવયોઽપિ તદીયલેશં
ઉક્ત્વા સવિસ્તરમહો વિરમન્તિ વાચઃ ॥ ૧૦૦॥

ઇઙ્ગ્વિધા તવ વિભો તનુરૈહિકસ્ય
પારત્રિકસ્ય ચ સુખસ્ય નૃણાં વિધાત્રી ।
ચેતઃસ્થિતિ મમ વિધાય વિધૂય દુઃખા
ન્યાનન્દભારમધિકં વિદધાતુ નિત્યમ્ ॥ ૧૦૧॥

સ્તોત્રં મયા કૃતમિદ પ્રતિવાસરં યે ।
સઙ્કીર્તયન્તિ કલયન્તિ ચ કર્ણયોર્યે ।
દેષ શ્રીભૂસમેત મૃદધીશ ભવત્પ્રસાદાત્
એષાં ચ સબૈમભિકાશિતમસ્તુ સિદ્ધમ્ ॥ ૧૦૨॥

ઇતિ શ્રી શ્રીયુતમૃન્નાથસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

---

*Shri Natha Stotram*

pdf was typeset on August 14, 2021

Please send corrections to *sanskrit@cheerful.com*